# बोर्ड कृतिपत्रिका : मार्च २०१९

## आनन्दः (संयुक्त-संस्कृतम्)

**अवधिः होराद्वयम्।** **गुणाङ्काः ५०**

**सूचनाः**

1. सूचनानुसारेण आकृतयः आरेखितव्यः।
2. आकृतीनाम् आरेखनं मसीलेखन्या कर्तव्यम् ।
3. सर्वासु कृतिषु वाक्यानां पुनर्लेखनम् आवश्यकम्।
४. लेखनं सुवाच्यं, स्पष्टं लेखननियमानुसारं च भवेत्।

### प्रथमः विभागः- सुगमसंस्कृतम्। (10)

**1. अ. चित्रं दृष्ट्वा नामानि लिखत। (5 तः 4)** 4

1) 

2) 

3) 

4) 


5) 


**आ. सङ्ख्याः अक्षरैः / अङ्कैः लिखत। (3 तः 2)** 2

1. ३२ 2. त्रयोविंशतिः 3. ९१

**इ. समय-स्तम्भमेलनं कुरुत।** 2

| क्र. | अ | आ |
|---|---|---|
| 1. | सपाद - त्रिवादनम् | ७.३० |
| 2. | दशाधिक - दशवादनम् | १.४५ |
| 3. | पादोन-द्विवादनम्। | ३.१५ |
| 4. | सार्ध-सप्तवादनम्। | १०.१० |

COEPian's ACADEMY™
We are a 'class' apart...

**ई. वासर–तालिकां पूरयत। (3 तः 2)** 2

| ह्यः | अद्यः | --------- | परश्वः |
|---|---|---|---|
| --------- | सोमवासरः | मङ्गलवासरः | --------- |

(ह्यः ← अद्य → --------- → परश्वः)

### द्वितीयः विभागः- गद्यम्। (16)

**2. अ. गद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत।** [5]

एकस्मिन् दिने शङ्करः स्नानार्थं पूर्णानदीं गतः। यदा सः स्नाने मग्नः तदा तत्र एकः नक्रः आगतः। नक्रः झटिति तस्य पादम् अगृह्णात्। तदा शङ्करः उच्चैः आक्रोशत्। "अम्ब! त्रायस्व। नक्रात् त्रायस्व!" आक्रोशं श्रुत्वा नदीतीरं प्राप्ता आर्याम्बा पुत्रं नक्रेण गृहीतमपश्यत्। भयाकुला सा अपि रोदनम् आरभत। शङ्करः मातरम् आर्ततया प्रार्थयत - "अम्ब, इतःपरम् अहं न जीवामि। मरणात् पूर्वं संन्यासी भवितुम् इच्छामि। अधुना वा देहि अनुमतिम्।" चेतसा अनिच्छन्ती अपि विवशा माता अवदत् - "वत्स, यथा तुभ्यं रोचते तथैव भवतु। इदानीमेव संन्यासं स्वीकुरु। मम अनुमतिः अस्ति" इति। तत्क्षणमेव आश्चर्यं घटितम्। दैववशात् शङ्करः नक्रात् मुक्तः । स नदीतीरम् आगत्य मातुः चरणौ प्राणमत्।

**1. अवबोधनम्। (4 त: 3)** **3**

क. उचितं कारणं चित्वा वाक्यं पुनर्लिखत। **1**

शङ्कर: उच्चै: आक्रोशत् यत: .............

1. स: नदीजले अमज्जत्।
2. नक्र: तस्य पादम् अगृह्णात्।

ख. क: कं वदति? **1**

“ यथा तुभ्यं रोचते तथैव भवतु।”

ग. पूर्णवाक्येन उत्तरं लिखत। **1**

शङ्कर: कस्माद् मुक्त: ?

घ. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत। **1**

एकस्मिन् दिने शङ्कर: स्नानार्थं गङ्गानदीं गत:।

**2. शब्दज्ञानम्। (3 त: 2)** **2**

क. गद्यांशात् २ द्वितीयाविभक्त्यन्त-पदे चित्वा लिखत। **1**

ख. गद्यांशात् विशेषण-विशेष्य-मेलनं कुरुत। **1**

| क्र. | अ | आ |
|---|---|---|
| 1. | एक: | माता |
| 2. | विवशा | आश्चर्यम् |
| | | नक्र: |

ग. पूर्वपदं/उत्तरपदं लिखत। **1**

1. गृहीतमपश्यत् = ........................ + अपश्यत्।
2. इदानीमेव = इदानीम् + ........................।

COEPian's ACADEMY™
We are a 'class' apart...

**आ. गद्यांशं पठित्वा निर्दिष्टा: कृती: कुरुत।** [5]

(अर्णव: जपाकुसुमं गृहीत्वा प्रविशति । तस्य पिता विज्ञानस्य प्राध्यापक:। स: पुस्तकपठने मग्न:। तस्य पार्श्वे उत्पीठिकायां सूक्ष्मेक्षिका वर्तते।)

अर्णव: – पित:, अस्माकम् उद्यानाद् जपाकुसुमम् आनीतं मया। कियन्त: सूक्ष्मा: तस्य परागकणा:!

पिता – सूक्ष्मेक्षिकया पश्य, तेषां कणानां रचनाम् अपि द्रष्टुं शक्नोषि ! (अर्णव: तथा करोति।)

पिता – किं दृष्टं त्वया?

अर्णव: – पित:, अद्भुतम् एतत्। अत्र परागकणस्य सूक्ष्माणि अङ्गानि दृश्यन्ते।

पिता – अर्णव, एतानि परागकणानाम् अङ्गानि त्वं सूक्ष्मेक्षिकया द्रष्टुं शक्नोषि। परन्तु एतद् विश्वं परमाणुभ्य: निर्मितम्। ते परमाणव: तु सूक्ष्मेक्षिकया अपि न दृश्यन्ते।

अर्णव: – परमाणु: नाम किम्?

पिता – अस्तु। कथयामि। मुष्टिमात्रान् तण्डुलान् महानसत: आनय।

अर्णव: – (तथेति उक्त्वा पाकगृहात् तण्डुलान् आनयति।) स्वीकरोतु, तात।

**कृतय:।**

**1. अवबोधनम्। (4 त: 3)** **3**

क. उचितं पर्यायं चित्वा वाक्यं पुनर्लिखत। **1**

1. एतद् विश्वं ........................... निर्मितम्।
   (तण्डुलै:/परमाणुभ्य:)
2. परागकणानां रचना ........................... दृश्यते।
   (नेत्राभ्यां/सूक्ष्मेक्षिकया)

ख. पूर्णवाक्येन उत्तरं लिखत। **1**

के सूक्ष्मेक्षिकया अपि न दृश्यन्ते?

ग. वाक्यं पुनर्लिखित्वा सत्यम्/असत्यम् इति लिखत। **1**

अर्णवस्य पिता विज्ञानस्य प्राध्यापकः।

घ. एषः गद्यांशः कस्मात् पाठात् उद्धृतः? **1**

**2. प्रवाहि-जालं पूरयत।** **2**




(तण्डुलान् आनयति।, सूक्ष्मेक्षिकया पश्यति।, जपाकुसुमं गृहीत्वा प्रविशति।, परमाणुविषये पृच्छति।)

**इ. गद्यांशं पठित्वा सरलार्थं लिखत। (2 तः 1)** [4]

1.

| | | |
|---|---|---|
| नदी (शुतुद्री) | - | विप्रवर, मधुरा खलु ते वाणी। रञ्जयति अस्मान्। वद कथं तव साहाय्यं कर्तव्यम्? |
| विश्वामित्रः | - | अम्ब, शृणु मे अभ्यर्थनाम्। गाधा मे भविष्यसि? स्वल्पीभवतु जलौघः। |

2.

| | | |
|---|---|---|
| कर्णः | - | महत्तरां भिक्षां भवते प्रदास्ये। गोसहस्रं ददामि |
| शक्रः | - | गोसहस्रमिति? मुहूर्तकं क्षीरं पिबामि। नेच्छामि कर्ण, नेच्छामि। |
| कर्णः | - | किं नेच्छति भवान्? अपर्याप्तं कनकं ददामि। |

COEPian's ACADEMY ™ We are a 'class' apart...

**ई. माध्यमभाषया उत्तरं लिखत। (2 तः 1)** [2]

1. भूमाता पृथुवैन्यं किम् उपादिशत्?
2. 'स नरः शत्रुनन्दनः।' इति वचनं कथायाः आधारेण स्पष्टीकुरुत।

## तृतीयः विभागः- पद्यम्। (12)

**3. अ. पद्यांशं पठित्वा निर्दिष्टाः कृतीः कुरुत। (5 तः 4)** [4]

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतम्
विद्या राजसु पूज्यते न तु धनं विद्याविहीनः पशुः।।१।।

यथा चतुर्भिः कनकं परीक्ष्यते निघर्षणच्छेदनतापताडनैः।
तथा चतुर्भिः पुरुषः परीक्ष्यते श्रुतेन शीलेन गुणेन कर्मणा।।२।।

यादृशं वपते बीजं क्षेत्रमासाद्य कर्षकः।
सुकृते दुष्कृते वाऽपि तादृशं लभते फलम्।।३।।

**क. पूर्णवाक्येन उत्तरं लिखत।** **1**

का गुरूणां गुरू:?

**ख. विशेषण-विशेष्य-मेलनं कुरुत।** **1**

| क्र. | अ | आ |
|---|---|---|
| 1. | भोगकरी | धनम् |
| 2. | प्रच्छन्नगुप्तं | विद्या |
| | | पुरुष: |

**ग. जालरेखाचित्रं पूरयत।** **1**




**घ.** २ प्रथमाविभक्त्यन्त-पदे लिखत। **1**

**च. उत्तरपदं लिखत।** **1**

1. क्षेत्रमासाद्य = क्षेत्रम् +________ ।
2. वाऽपि = वा +________ ।

**आ. पद्ये शुद्धे पूर्णे च लिखत। (3 त: 2)** **[4]**

COEPian's ACADEMY™ We are a 'class' apart...

1. आ मनो ................................
................................साधनम्।।
2. यत्र ................................
................................द्रुमायते।।
3. अल्पानामपि................................
................................मत्तदन्तिन:।।

**इ. माध्यमभाषया सरलार्थं लिखत। (2 त: 1)** **[2]**

1. यथैव सकला नद्य: प्रविशन्ति महोदधिम्।
तथा मानवताधर्मं सर्वे धर्मा: समाश्रिता:।।१।।
2. शीलं सद्गुणसम्पत्ति: ज्ञानं विज्ञानमेव च।
उत्साहो वर्धते येन वाचनं तद् हितावहम्।।२।।

**ई. माध्यमभाषया उत्तरं लिखत। (2 त: 1)** **[2]**

1. वाचनमुपकारकं कथं इति स्पष्टीकुरुत।
2. 'वैद्यराज नमस्तुभ्यं ..........' इति श्लोकस्य स्पष्टीकरणं माध्यमभाषया लिखत।

## चतुर्थः विभागः- लेखनकौशलम् (3 तः 2) (4)

**4. अ. विशिष्टविभक्तेः उपयोगं कृत्वा वाक्यनिर्माणं कुरुत। (4 तः 2)** [2]

1. कृते
2. स्निह् (4 प.प)
3. दा-यच्छ् (1 प.प/3 प.प)
4. सह।

**आ. संस्कृतानुवादं कुरुत। (4 तः 2)** [2]

1. आकाशाचा रंग निळा आहे.

   The colour of the sky is blue.
   आकाश का रंग नीला है।

2. जंगलात पशुपक्षी राहतात.

   Animals and birds live in the forest.
   जंगल में पशु-पक्षी रहते हैं।

3. मी सकाळी देवाला नमस्कार करतो.

   I bow to the God in the morning.
   मैं सुबह ईश्वर को प्रणाम करता हूँ।

4. मुलांचे जीवन सफल होवो.

   May the life of the children be successful.
   बच्चों का जीवन सफल हो।

**इ. अमरकोषात् समानार्थकं शब्दं योजयित्वा वाक्यं पुनर्लिखत। (4 तः 2)** [2]

COEPian's ACADEMY™
We are a 'class' apart...

1. कर्षकः बीजं वपते।
2. मनुजाः वाचनेन बहून् विषयान् बोधन्ते।
3. चतुर्भिः कनकं परीक्ष्यते।
4. कृष्णः अर्जुनस्य मित्रम्।

## पञ्चमः विभागः- भाषाभ्यासः (8)

**5. अ. पृथक्करणम्।(5 तः 4)** [4]

1. **नामानि सर्वनामानि च पृथक्कुरुत।** 2

| नाम | सर्वनाम |
|---|---|
| | |

(मञ्जूषा - भानुः, मया, इयम्, राजा, एतानि)

2. **क्रियापदानि धातुसाधित-विशेषणानि च पृथक्कुरुत।** 2

| क्रियापदम् | धातुसाधित-विशेषणम् |
|---|---|
| | |

(मञ्जूषा - गतवान्, पठिष्यति, खादितः, नृत्यतु, लभते)

**आ. निर्दिष्टाः कृतीः कुरुत। (4 तः 2)** [4]

**1. सङ्ख्या / क्रम / आवृत्तिवाचकस्य योग्यं पर्यायं चित्वा वाक्यं पुनर्लिखत। (3 तः 2)** 2

क. ________ वेदाः वर्तन्ते। (चत्वारि/चत्वारः)

ख. भोजने ________ रसाः भवन्ति। (षष्ठः/षड्)

ग. वर्षस्य ________ परीक्षा भवति। (चतुर्वारं/चतुर्षु)

**2. समासविग्रहाणां समासनामभिः सह मेलनं कुरुत। (6 तः 4)** 2

| | समासविग्रहः | समासनाम |
|---|---|---|
| १. | कुम्भं करोति इति। | कर्मधारयः। |
| २. | न योग्यम्। | इतरेतर-द्वन्द्वः। |
| ३. | प्रयागं नाम क्षेत्रम्। | नञ्-तत्पुरुषः। |
| ४. | काकः च शृगालः च। | अव्ययीभावः। |
| ५. | भाले चन्द्रः यस्य सः। | उपपद-तत्पुरुषः। |
| ६. | दिने दिने। | बहुव्रीहिः। |

**3. समानार्थकशब्दान्/विरुद्धार्थकशब्दान् चित्वा लिखत।** 2

(मञ्जूषा – शिष्यः, अवगुणः, विस्मरसि, सबलः)

1. गुणः × _______।
2. छात्रः = _______।
3. स्मरसि × _______।
4. बलवान् = _______।

**4. योग्यं पर्यायं चिनुत। (3 तः 2)** 2

1. अहं शब्दं करोमि। (कर्तृवाच्यम्/कर्मवाच्यम्)
2. भवान् अपि अपरिचितः एव _______। (आसीः / आसीत्)
3. सङ्गीते _______ स्वराः सन्ति। (विविधाः/विविधः)

COEPian's ACADEMY™
We are a 'class' apart...